# Shrimad Gitasara from Agni Purana 381

# શ્રીમદ્ ગીતાસારઃ અગ્નિપુરાણાન્તર્ગતઃ

## Document Information

Text title : gItAsAra agnipurANAntargatam

File name : gItAsAraagnipurANa.itx

Category : gItA, giitaa, bhagavadgItA, agnipurANa

Location : doc_giitaa

Transliterated by : sa.wikisource.org

Proofread by : PSA Easwaran

Description-comments : Agnipurana adhyAya 381

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

Shrimad Gitasara from Agni Purana 381

# શ્રીમદ્ ગીતાસારઃ અગ્નિપુરાણાન્તર્ગતઃ

અગ્નિરુવાચ –
ગીતાસારં પ્રવક્ષ્યામિ સર્વગીતોત્તમોત્તમમ્ ।
કૃષ્ણોઽર્જુનાય યમાહ પુરા વૈ ભુક્તિમુક્તિદમ્ ॥ ૩૮૧.૧ ॥

શ્રીભગવાનુવાચ –
ગતાસુરગતાસુર્વા ન શોચ્યો દેહવાનજઃ ।
આત્માઽજરોઽમરોઽભેદ્યસ્તસ્માચ્છોકાદિકં ત્યજેત્ ॥ ૩૮૧.૨ ॥

ધ્યાયતો વિષયાન્ પુંસઃ સઙ્ગસ્તેષૂપજાયતે ।
સઙ્ગાત્ કામસ્તતઃ ક્રોધઃ ક્રોધાત્સમ્મોહ એવ ચ ॥ ૩૮૧.૩ ॥

સમ્મોહાત્ સ્મૃતિવિભ્રંશો બુદ્ધિનાશાત્ પ્રણશ્યતિ ।
દુઃસઙ્ગહાનિઃ સત્સઙ્ગાન્મોક્ષકામી ચ કામનુત્ ॥ ૩૮૧.૪ ॥

કામત્યાગાદાત્મનિષ્ઠઃ સ્થિરપ્રજ્ઞસ્તદોચ્યતે ।
યા નિશા સર્વભૂતાનાં તસ્યાં જાગર્તિ સંયમી ॥ ૩૮૧.૫ ॥

યસ્યાં જાગ્રતિ ભૂતાનિ સા નિશા પશ્યતો મુનેઃ ।
આત્મન્યેવ ચ સન્તુષ્ટસ્તસ્ય કાર્યં ન વિદ્યતે ॥ ૩૮૧.૬ ॥

નૈવ તસ્ય કૃતેનાર્થો નાકૃતેનેહ કશ્ચન ।
તત્ત્વવિત્તુ મહાવાહો ગુણકર્મવિભાગયોઃ ॥ ૩૮૧.૭ ॥

ગુણા ગુણેષુ વર્તન્તે ઇતિ મત્વા ન સજ્જતે ।
સર્વં જ્ઞાનપ્લવેનૈવ વૃજિનં સન્તરિષ્યતિ ॥ ૩૮૧.૮ ॥

જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્ કુરુતેઽર્જુન ।
બ્રહ્મણ્યાધાય કર્માણિ સઙ્ગં ત્યક્ત્વા કરોતિ યઃ ॥ ૩૮૧.૯ ॥

લિપ્યતે ન સ પાપેન પદ્મપત્રમિવામ્ભસા ।
સર્વભૂતેષુ ચાત્માનાં સર્વભૂતાનિ ચાત્મનિ ॥ ૩૮૧.૧૧ ॥

ઈક્ષતે યોગયુક્તાત્મા સર્વત્ર સમદર્શનઃ ।
શુચીનાં શ્રીમતાં ગેહે યોગભ્રષ્ટોઽભિજાયતે ॥ ૩૮૧.૧૧ ॥

ન હિ કલ્યાણકૃત્ કશ્ચિદ્દુર્ગતિં તાત ગચ્છતિ ।
દૈવી હ્યેષા ગુણમયી મમ માયા દુરત્યયા ॥ ૩૮૧.૧૨ ॥

મામેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે ।
આર્તો જિજ્ઞાસુરર્થાર્થી જ્ઞાની ચ ભરતર્ષભ ॥ ૩૮૧.૧૩ ॥

ચતુર્વિધા ભજન્તે માં જ્ઞાની ચૈકત્વમાસ્થિતઃ ।
અક્ષરં બ્રહ્મ પરમં સ્વભાવોઽધ્યાત્મમુચ્યતે ॥ ૩૮૧.૧૪ ॥

ભૂતભાવોદ્ભવકરો વિસર્ગઃ કર્મસંજ્ઞિતઃ ।
અધિભૂતં ક્ષરો ભાવઃ પુરુષશ્ચાધિદૈવતમ્ ॥ ૩૮૧.૧૫ ॥

અધિયજ્ઞોઽહમેવાત્ર દેહે દેહભૃતાં વર ।
અન્તકાલે સ્મરન્માગ્ચ મદ્ભાવં યાત્યસંશયઃ ॥ ૩૮૧.૧૬ ॥

યં યં ભાવં સ્મરન્નન્તે ત્યજેદ્દેહં તમાપ્નુયાત્ ।
પ્રાણં ન્યસ્ય ભ્રુવોર્મધ્યે અન્તે પ્રાપ્નોતિ મત્પરમ્ ॥ ૩૮૧.૧૭ ॥

ઓમિત્યેકાક્ષરં બ્રહ્મ વદન્ દેહં ત્યજન્ તથા ।
બ્રહ્માદિસ્તમ્ભપર્યન્તાઃ સર્વે મમ વિભૂતયઃ ॥ ૩૮૧.૧૮ ॥

શ્રીમન્તશ્ચોર્જિતાઃ સર્વે મમાંશાઃ પ્રાણિનઃ સ્મૃતાઃ ।
અહમેકો વિશ્વરુપ ઇતિ જ્ઞાત્વા વિમુચ્યતે ॥ ૩૮૧.૧૯ ॥

ક્ષેત્રં શરીરં યો વેત્તિ ક્ષેત્રજ્ઞઃ સ પ્રકીર્તિતઃ ।
ક્ષેત્રક્ષેત્રજ્ઞયોર્જ્ઞાનં યત્તજ્જ્ઞાનં મતં મમ ॥ ૩૮૧.૨૧ ॥

મહાભૂતાન્યહઙ્ગારો બુદ્ધિરવ્યક્તમેવ ચ ।
ઇન્દ્રિયાણિ દશૈકઞ્ચ પઞ્ચ ચેન્દ્રિયગોચરાઃ ॥ ૩૮૧.૨૧ ॥

ઇચ્છા દ્વેષઃ સુખં દુઃખં સઙ્ઘાતશ્ચેતના ધૃતિઃ ।
એતત્ક્ષેત્રં સમાસેન સવિકારમુદાહૃતમ્ ॥ ૩૮૧.૨૨ ॥

અમાનિત્વમદમ્ભિત્વમહિંસા ક્ષાન્તિરાર્જવમ્ ।
આચાર્યોપાસનં શૌચં સ્થૈર્યમાત્મવિનિગ્રહઃ ॥ ૩૮૧.૨૩ ॥

ઇન્દ્રિયાર્થેષુ વૈરાગ્યમનહઙ્કાર એવ ચ ।
જન્મમૃત્યુજરાવ્યાધિદુઃખદોષાનુદર્શનમ્ ॥ ૩૮૧.૨૪ ॥

આસક્તિરનભિષ્વઙ્ગઃ પુત્રદારગૃહાદિષુ ।
નિત્યઞ્ચ સમચિત્તત્ત્વમિષ્ટાનિષ્ટોપપત્તિષુ ॥ ૩૮૧.૨૫ ॥

મયિ ચાનન્યયોગેન ભક્તિરવ્યભિચારિણી ।
વિવિક્તદેશસેવિત્વમરતિર્જનસંસદિ ॥ ૩૮૧.૨૬ ॥

અધ્યાત્મજ્ઞાનનિષ્ઠત્વન્ તત્ત્વજ્ઞાનાનુદર્શનમ્ ।
એતજ્જ્ઞાનમિતિ પ્રોક્તમજ્ઞાનં યદતોઽન્યથા ॥ ૩૮૧.૨૭ ॥

જ્ઞેયં યત્તત્ પ્રવક્ષ્યામિ યત્ જ્ઞાત્વાઽમૃતમશ્નુતે ।
અનાદિ પરમં બ્રહ્મ સત્ત્વં નામ તદુચ્યતે ॥ ૩૮૧.૨૮ ॥

સર્વતઃ પાણિપાદાં તત્ સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૩૮૧.૨૯ ॥

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દિયવિવર્જિતમ્ ।
અસક્તં સર્વભૃચ્ચૈવ નિર્ગુણં ગુણભોક્તૃ ચ ॥ ૩૮૧.૩૧ ॥

બહિરન્તશ્ચ ભૂતાનામચરઞ્ચરમેવ ચ ।
સૂક્ષ્મત્વાત્તદવિજ્ઞેયં દૂરસ્થઞ્ચાન્તિકેઽપિ યત્ ॥ ૩૮૧.૩૧ ॥

અવિભક્તઞ્ચ ભૂતેષુ વિભક્તમિવ ચ સ્થિતમ્ ।
ભૂતભર્તૃ ચ વિજ્ઞેયં ગ્રસિષ્ણુ પ્રભવિષ્ણુ ચ ॥ ૩૮૧.૩૨ ॥

જ્યોતિષામપિ તજ્જયોતિસ્તમસઃ પરમુચ્યતે ।
જ્ઞાનં જ્ઞેયં જ્ઞાનગમ્યં હૃદિ સર્વસ્ય ધિષ્ઠિતમ્ ॥ ૩૮૧.૩૩ ॥

ધ્યાનેનાત્મનિ પશ્યન્તિ કેચિદાત્માનમાત્મના ।
અન્યે સાઙ્ખ્યેન યોગેન કર્મયોગેન ચાપરે ॥ ૩૮૧.૩૪ ॥

અન્યે ત્વેવમજાનન્તો શ્રુત્વાન્યેભ્ય ઉપાસતે ।
તેઽપિ ચાશુ તરન્ત્યેવ મૃત્યું શ્રુતિપરાયણાઃ ॥ ૩૮૧.૩૫ ॥ BG 13.25 ચાતિતર
સત્ત્વાત્સઞ્જાયતે જ્ઞાનં રજસો લોભ એવ ચ ।
પ્રમાદમોહૌ તમસો ભવતોઽજ્ઞાનમેવ ચ ॥ ૩૮૧.૩૬ ॥

ગુણા વર્તન્ત ઇત્યેવ યોઽવતિષ્ઠતિ નેઙ્ગતે ।
માનાવમાનમિત્રારિતુલ્યસ્ત્યાગી સ નિર્ગુણઃ ॥ ૩૮૧.૩૭ ॥

ઊર્ધ્વમૂલમધઃશાખમશ્વત્થં પ્રાહુરવ્યયમ્ ।

છન્દાંસિ યસ્ય પર્ણાનિ યસ્તં વેદ સ વેદવિત્ ॥ ૩૮૧.૩૮ ॥

દ્વૌ ભૂતસર્ગૌ લોકેઽસ્મિન્ દૈવ આસુર એવ ચ ।
અહિંસાદિઃ ક્ષમા ચૈવ દૈવીસમ્પત્તિતો નૃણામ્ ॥ ૩૮૧.૩૯ ॥

ન શૌચં નાપિ વાચારો હ્યાસુરીસમ્પદોદ્ભવઃ ।
નરકત્વાત્ ક્રોધલોભકામસ્તસ્માત્રયં ત્યજેત્ ॥ ૩૮૧.૪૧ ॥

યજ્ઞાસ્તપસ્તથા દાનં સત્ત્વાદ્યૈસ્ત્રિવિધં સ્મૃતમ્ ।
આયુઃ સત્ત્વબલારોગ્યસુખાયાન્નન્તુ સાત્ત્વિકમ્ ॥ ૩૮૧.૪૧ ॥

દુઃખશોકામયાયાન્નં તીક્ષ્ણરૂક્ષન્તુ રાજસમ્ ।
અમેધ્યોચ્છિષ્ટપૂત્યન્નં તામસં નીરસાદિકમ્ ॥ ૩૮૧.૪૨ ॥

યષ્ટવ્યો વિધિના યજ્ઞો નિષ્કામાય સ સાત્ત્વિકઃ ।
યજ્ઞઃ ફલાય દમ્ભાત્મી રાજસસ્તામસઃ ક્રતુઃ ॥ ૩૮૧.૪૩ ॥ var દમ્ભાર્થં
શ્રદ્ધામન્ત્રાદિવિધ્યુક્તં તપઃ શારીરમુચ્યતે ।
દેવાદિપૂજાઽહિંસાદિ વાઙ્મયં તપ ઉચ્યતે ॥ ૩૮૧.૪૪ ॥

અનુદ્વેગકરં વાક્યં સત્યં સ્વાધ્યાયસજ્જપઃ ।
માનસં ચિત્તસંશુદ્ધેર્મૌનમાત્મવિનિગ્રહઃ ॥ ૩૮૧.૪૫ ॥

સાત્ત્વિકઞ્ચ તપોઽકામં ફલાદ્યર્થન્તુ રાજસમ્ ।
તામસં પરપીડાયૈ સાત્ત્વિકં દાનમુચ્યતે ॥ ૩૮૧.૪૬ ॥

દેશાદૌ ચૈવ દાતવ્યમુપકારાય રાજસમ્ ।
અદેશાદાવવજ્ઞાતં તામસં દાનમીરિતમ્ ॥ ૩૮૧.૪૭ ॥

ઓંતત્સદિતિ નિર્દેશો બ્રહ્મણસ્ત્રિવિધઃ સ્મૃતઃ ।
યજ્ઞદાનાદિકં કર્મ ભુક્તિમુક્તિપ્રદં નૃણામ્ ॥ ૩૮૧.૪૮ ॥

અનિષ્ટમિષ્ટં મિશ્રઞ્ચ ત્રિવિધં કર્મણઃ ફલમ્ ।
ભવત્યત્યાગિનાં પ્રેત્ય ન તુ સન્ન્યાસિનાં ક્વચિત્ ॥ ૩૮૧.૪૯ ॥

તામસઃ કર્મસંયોગાત્ મોહાત્ક્લેશભયાદિકાત્ ।
રાજસઃ સાત્ત્વિકોઽકામાત્ પઞ્ચૈતે કર્મહેતવઃ ॥ ૩૮૧.૫૧ ॥

અધિષ્ઠાનં તથા કર્તા કરણઞ્ચ પૃથગ્વિધમ્ ।
ત્રિવિધાશ્ચ પૃથક્ ચેષ્ટા દૈવઞ્ચૈવાત્ર પઞ્ચમમ્ ॥ ૩૮૧.૫૧ ॥

એકં જ્ઞાનં સાત્ત્વિકં સ્યાત્ પૃથગ્ જ્ઞાનન્તુ રાજસમ્ ।

અતત્ત્વાર્થન્તામસં સ્યાત્ કર્માકામાય સાત્ત્વિકમ્ ॥ ૩૮૧.૫૨ ॥

કામાય રાજસં કર્મ મોહાત્ કર્મ તુ તામસમ્ ।
સિદ્ધ્યસિદ્ધ્યોઃ સમઃ કર્તા સાત્ત્વિકો રાજસોઽત્યપિ ॥ ૩૮૧.૫૩ ॥

શઠોઽલસસ્તામસઃ સ્યાત્ કાર્યાદિધીશ્ચ સાત્ત્વિકી ।
કાર્યાર્થં સા રાજસી સ્યાદ્વિપરીતા તુ તામસી ॥ ૩૮૧.૫૪ ॥

મનોધૃતિઃ સાત્ત્વિકી સ્યાત્ પ્રીતિકામેતિ રાજસી ।
તામસી તુ પ્રશોકાદૌ સુખં સત્ત્વાત્તદન્તગમ્ ॥ ૩૮૧.૫૫ ॥

સુખં તદ્રાજસઞ્ચાગ્રે અન્તે દુઃખન્તુ તામસમ્ ।
અતઃ પ્રવૃત્તિર્ભૂતાનાં યેન સર્વમિદન્તતમ્ ॥ ૩૮૧.૫૬ ॥

સ્વકર્મણા તમભ્યર્ચ્ય વિષ્ણું સિદ્ધિઞ્ચ વિન્દતિ ।
કર્મણા મનસા વાચા સર્વાવસ્થાસુ સર્વદા ॥ ૩૮૧.૫૭ ॥

બ્રહ્માદિસ્તમ્ભપર્યન્તં જગદ્વિષ્ણુઞ્ચ વેત્તિ યઃ ।
સિદ્ધિમાપ્નોતિ ભગવદ્ભક્તો ભાગવતો ધ્રુવમ્ ॥ ૩૮૧.૫૮ ॥

ઇત્યાદિમહાપુરાણે આગ્નેયે ગીતાસારો નામૈકાશીત્યધિકત્રિશતતમોઽધ્યાયઃ ॥

Agnipurana Chapter 381
From sa.wikisource.org
Proofread by PSA Easwaran

*Shrimad Gitasara from Agni Purana 381*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*